SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-3, (Jul-Sep) 2025

# अभिज्ञानशकुन्तलनाटकनिष्ठमहाकविवाक्येषु वस्तुध्वनिसमीक्षणम्
# Abhijñānaśakuntalanāṭakaniṣṭhmahākavivākyeṣu vastudhvanisamīkṣaṇam

**Dr. Manteswar Barman**
Assistant Professor of Sanskrit
University B.T and Evening College
Keshab Road, Gunjabari, Cooch Behar
Email: barmanmanteswar@gmail.com

**Abstract:** Kālidāsa's *Abhijñānaśakuntalam* is a quintessential example of classical Sanskrit drama, noted for its poetic excellence and emotional depth. To analyze this work through the framework of Anandavardhana's *Dhvanyāloka* a key text on literary aesthetics, provides a nuanced understanding of its literary qualities. Anandavardhana's theory emphasizes *dhvani* (suggestion or implication) as the cornerstone of poetic beauty, encompassing various aspects like *vastudhvani* (suggestion of the subject matter), *alamkāra-dhvani* (suggestion of ornamentation), and *rasa-dhvani* (suggestion of emotional experience). This analysis explores how Kālidāsa's play exemplifies these concepts and contributes to its enduring appeal. *Vastudhvani* pertains to how the subject matter of a work is presented and suggested through nuanced expression. In *Abhijñānaśakuntalam*, Kālidāsa masterfully employs *vastudhvani* to explore themes of love, separation, and reunion. The play's portrayal of Śakuntalā's love for Duṣyanta and the resulting trials is not merely described but suggested through intricate details and subtext. For example, the depiction of the natural world, such as the forest and the hermitage, serves as a backdrop that mirrors the emotional states of the characters. The forest is not just a setting but a symbol of Śakuntalā's emotional journey its tranquility reflecting her initial bliss, its harshness mirroring her trials, and its eventual beauty symbolizing her reunion with Duṣyanta. Kālidāsa's use of imagery like the description of the deer and the recurring motif of the ring functions as a vehicle for suggesting the deeper themes of love and fate. The broken ring, which is crucial to the plot, symbolizes the interruption in their love and the eventual restoration of their relationship. Through these symbols, Kālidāsa subtly suggests the narrative's emotional and thematic layers, embodying Anandavardhana's principle of *vastudhvani*.

**Keywords:** Kālidāsa, Vastudhvani, Anandavardhana, *Dhvanyāloka,* Śakuntalā, Duṣyanta

## उपोद्घातः

ध्वनिकाव्यानि विरचय्य ये खलु महाकवयः काव्यजगति स्वप्रतिष्ठां सूचितवन्तः तेषां संख्या अतिन्यूना दृश्यते इति आनन्दवर्धनमतम्। विषयेऽस्मिन् आनन्दवर्धनाचार्येण सुष्ठु संसूचितमस्ति

प्रासङ्गिकं वचनमिदं यत् साहित्यसंसारे कालिदासप्रभृतयः द्वित्राः पञ्चषाः वा महाकवयः सन्ति[1]। वाक्येऽस्मिन् कालिदासनामग्रहणेन आनन्दवर्धनाचार्यः तत्रभवन्तं कविकालिदासं महाकविश्रेणीषु एव अन्तर्भावयति इति तु स्पष्टतया ज्ञायते। इत्थं ध्वनिकारेण कविकालिदासः श्रेष्ठकविरूपेण विचारितो भवति इति वक्तुं शक्यते। प्रसङ्गेऽस्मिन् महाकविलक्षणम् अवधारणीयं वर्त्तते। राजशेखरेण महाकविलक्षणप्रसङ्गे उक्तमस्ति यत् महाकविः सर्वगुणयोगी भूत्वा अन्यतरप्रबन्धकर्मणि प्रवीणो भवति[2]। महाकविः न केवलम् एकस्य गुणस्य अथवा गुणद्वयस्य अधिकारी भवति। परन्तु स सर्वेषां काव्यगुणानाम् अधिकारी भवति। महाकविविरचितानि काव्यानि सर्वदा रसोत्तीर्णानि भूत्वा सहृदयहृदयाह्लादकारीणि भवन्ति। ध्वनिकारोच्चारितवाक्यमिदं प्रमाणीकरोति यत् महाकविकालिदासविरचितेषु काव्येषु ध्वनिबाहुल्यं परिलक्ष्यते सर्वथा। अस्मात् कारणात् आनन्दवर्धनाचार्यः तदीये *ध्वन्यालोक*ग्रन्थे उदाहरणरूपेण स्थाने स्थाने महाकविकालिदासविरचितान् श्लोकान् गृहीत्वा स्वव्याख्यानं प्रस्तौति[3]। *ध्वन्यालोके* महाकविरूपेण गृहीतस्य कालिदासस्य कीर्त्तिसमुदायः निश्चितरूपेण आनन्दवर्धनम् आकर्षयति इति कथने नास्ति कोऽपि सन्देहः। तथा च, कालिदासप्रणीतानि काव्यानि च ध्वनिकारः सम्यक् अधीतवान् इत्यपि वक्तुं शक्यते। अतएव यद्यपि *ध्वन्यालोके* पञ्चषाणां कालिदासीयश्लोकानाम् अन्तर्भुक्तिः वाचिकरूपेण दृश्यते परन्तु समग्रेषु ग्रन्थेषु *रामायणमहाभारत*रूपमहाकाव्यद्वयं तथा च कालिदासप्रणीतं काव्यजातम् आनन्दवर्धनस्य चिन्तायां निरन्तरम् आसीत् इति कल्पने न जायते कोऽपि दोषः। तथा च, आनन्दवर्धनेन ध्वनिप्रकाराः यथा निर्दिष्टाः तदनुसारं संस्कृतकाव्यगतध्वनिविवेचनं सर्वथा फलदायकं भवति।

**वस्तुध्वनिः**

आनन्दवर्धनाचार्यः *ध्वन्यालोकस्य* प्रथमोद्योते ध्वनेः स्वरूपं वर्णयित्वा तस्य भेदविषये आलोचयन् कथयति यत् मुख्यतया ध्वनेः भेदत्रयमस्ति[4]। तत् यथा वस्तुध्वनिः, अलंकारध्वनिः, रसध्वनिः च। अस्मिन् प्रकारत्रये सर्वत्रैव वाच्यार्थात् सर्वथा प्रतीयमानार्थस्य भिन्नत्वं परिलक्ष्यते[5]। ध्वनिप्रकारे सर्वत्र प्रतीयमानार्थः वाच्यार्थसामर्थ्येन आक्षिप्तो भूत्वा वस्तुध्वनिः, अलंकारध्वनिः, रसध्वनिः च इति रूपत्रयेण प्रकाशितो भवति रसङ्गाचित्ते[6] इति पूर्वमेव उक्तमस्ति। अतः वस्तुध्वनिः, अलंकारध्वनिः, रसध्वनिः चेति त्रयाणां ध्वनिनां सामान्यवैशिष्ट्यं वाच्यसामर्थ्याक्षिप्तत्वम् इति वक्तुं शक्यते। यद्यपि ध्वननकार्यं शब्दस्य व्यापारो भवति, किन्तु ध्वनिविषये अर्थशक्तिसहकारिता सर्वदा वर्त्तते। वाच्यार्थः ध्वनिविषये अन्यतमम् उपादानं भवति। अतएव ध्वनिविषये वाच्यार्थस्य गुरुत्वं सर्वथा परिलक्ष्यते। उदाहरणेन एकेन आनन्दवर्धनः विषयमिमं प्रकटयति तदीये ग्रन्थे। यथा आलोकार्थी जनः आलोकोपायरूपेण दीपशिखां प्रति यत्नवान् भवति, तद्वद् व्यङ्ग्यार्थप्रत्याशी व्यङ्ग्यार्थसूत्ररूपेण वाच्यार्थं प्रति यत्नवान् भवति[7]। अभिनवगुप्ताचार्येण *लोचने* सविस्तारम् इदं व्याख्यायते। एतदपि तत्रभवता दर्शितं यत् वस्तुध्वन्यलंकारध्वनिरसध्वनीनां बहवः अवान्तरभेदाः सम्भवन्ति। परन्तु तत्र मुख्यरूपेण

प्रतीयमानार्थस्य भेदद्वयमस्ति, लौकिकः इति प्रथमः, काव्यव्यापारगोचरः इति द्वितीयः चेति[8]। लौकिकप्रतीयमानार्थः विधिनिषेधादिनिष्ठः अनेकप्रकारको भवति[9]। ध्वनिप्रसङ्गे वस्तुपदेन काव्यनिष्ठशब्दवाच्यतातिक्रान्तः लौकिकविधिनिषेधादिकः अनेकप्रकारकः अर्थः सूच्यते। अस्य ध्वनेः कथावस्तुना सह प्रत्यक्षतया सम्बन्धः तिष्ठति। अतएव वक्तुं शक्यते यत् वाच्यार्थापेक्षया यः चमत्कारी व्यङ्ग्यार्थरूपः लौकिकविधिनिषेधादिविषयः सहृदयहृदयम् आह्लादयति स वस्तुध्वनिः इत्युच्यते। काव्यजगति वर्तमानः वस्तुध्वनिः रूपभिन्नत्वं भजते। स कदाचित् विधिमुखे प्रतिषेधरूपः, कदाचित् प्रतिषेधमुखे विधिरूपः, क्वचिद् विधिरूपे वाच्ये अनुभयरूपः, क्वचिद् पुनः प्रतिषेधरूपे वाच्ये अनुभयरूपः दृश्यते।

**अभिज्ञानशकुन्तलनाटकनिष्ठमहाकविवाक्येषु वस्तुध्वनिः**

*अभिज्ञानशकुन्तल*नाटके न श्लोकेषु परन्तु नाटकीयवचनेषु अपि बहुत्र वस्तुध्वनिः परिलक्ष्यते। अधुना *अभिज्ञानशकुन्तल*निष्ठवाक्यगतवस्तुध्वनिः समीक्ष्यते सविस्तरम् अस्मिन् अंशे। अस्मिन् प्रसङ्गे द्वितीयांकगते विदूषकवाक्ये दृष्टिः गच्छति। "न खलु मां रक्षोभीरुकं गणयसि"[10] इत्यत्र वाच्यार्थं व्यतिरिच्य व्यङ्ग्यार्थरूपः प्रतीयमानार्थः दृश्यते। वाक्यस्य अस्य वाच्यार्थेन एतत् ज्ञायते यत् राक्षसभीरुकरूपेण विदूषकः राज्ञा न गणनीयः इति राजानं दुष्यन्तं प्रति विदूषकस्य प्रार्थना। अत्र विदूषकवचनस्य वाचिकोऽर्थः यत् विदूषकः राक्षसात् न विभेति। नञर्थशब्दप्रयोगात् वाक्यस्य अस्य प्रतिषेधरूपः अर्थः बोध्यते। किन्तु नाटकीयकथावस्तुनः एतत् ज्ञायते यत् विदूषकः प्रकृततः राक्षसात् विभेति। नाटकगतद्वितीयांके दृश्यते यत् राजा विदूषकसमीपे शकुन्तलारूपलावण्यं वर्णयित्वा तं जिज्ञासति यत् शकुन्तलादर्शने तस्य कुतूहलम् अस्ति न वा[11]? तदा विदूषकः दुष्यन्तं वदति यत् आदौ तस्य शकुन्तलादर्शनेच्छा आसीत् किन्तु इदानीं राक्षसवृत्तान्तं श्रुत्वा सा इच्छा नष्टा जाता[12]। अनेन स्पष्टीभवति यत् विदूषकः यथार्थतः राक्षसभीरुकः अस्ति। अत्र एतदपि लक्षनीयं यत् विदूषकः राक्षसभीरुकः नास्ति इति विदूषकवचनं श्रुत्वा राजा दुष्यन्तः सस्मितं तं वदति यत् राजा एतत् कदापि न चिन्तयति[13]। राज्ञः दुष्यन्तस्य स्मिताननं व्यञ्जनया एतत् प्रमाणीकरोति यत् विदूषकः प्रकृततः राक्षसभीरुकः अस्ति। तथा च नाटकस्य अस्य दर्शकाः षष्ठांकेऽपि भयभीतं विदूषकं पश्यन्ति[14]। एवंक्रमेण विदूषकमुखनिःसृतवाक्यमिदं वाच्यार्थम् अतिक्रम्य नाटकीयकथावस्तु सूचयति। यस्य प्रकाशः स्थाने स्थाने सहृदयैः आस्वाद्यते। अतः एतत् स्पष्टरूपेण प्रतिभाति यत् वाच्यार्थे वाक्यस्य अस्य चारुत्वातिशय्यं नास्ति। तत् यथा अस्ति व्यङ्ग्यार्थघटके वस्तुधनौ। अतएव व्याख्यान्ते एतत् वक्तुं शक्यते यत् एतत्वाक्यगतः *राक्षसभीरुकः नास्ति* इति प्रतिषेधरूपः अर्थः प्रकृततः *राक्षसभीरुकः अस्ति* इति विधिरूपं व्यङ्ग्यार्थं सूचयति। अतएव वाक्येऽस्मिन् वाच्ये प्रतिषेधरूपे विधिरूपः वस्तुध्वनिः विद्यते आनन्दवर्धनमतानुसारम्[15] इति वक्तुं शक्यते।

*अभिज्ञानशकुन्तल*नाटके द्वितीयांके विदूषकमुद्दिश्य दुष्यन्तेन उक्तमेकं वचनमस्ति "न खलु सत्यमेव तापसकन्यकायां ममाभिलाषः"[16] इति। अस्मिन् वाक्येऽपि वस्तुध्वनिप्रसरः दृश्यते।

तापसकन्यां शकुन्तलां प्रति राज्ञः दुष्यन्तस्य कोऽपि अभिलाषः नास्ति इति वाक्यस्य अस्य वाच्यार्थो भवति। अनेन वाच्यार्थेन निषेधरूपः अर्थः प्रकाश्यते। परन्तु एतत् वचनं न सत्यम्। राजधानीगमनसमये राजा दुष्यन्तः चिन्तयति यत् चपलस्वभावः विदूषकः राजधानीं गत्वा शकुन्तलाविषयं यदि अन्तःपुरस्थाभ्यः पत्नीभ्यः निवेदयति तदा शकुन्तलाप्राप्तिः विघ्निता भविष्यति। एवं चिन्तयित्वा स विदूषकमुद्दिश्य वदति यत् ऋषिगौरवात् स आश्रमं गमिष्यति[17], नास्ति अत्र किमपि कारणान्तरम्। दुष्यन्तः स्पष्टतया कथयति यत् तापसकन्यां शकुन्तलां प्रति तस्य कोऽपि अभिलाषः नास्ति। अतः परिहासोक्तं पूर्वकथनं सत्यरूपेण न ग्रहणीयम्[18]। किन्तु वाक्यस्य अस्य प्रतिषेधरूपः वाच्यार्थः न तथा चारुत्वातिशय्यम् आनयति, यथा आनयति अन्तर्निहितः व्यङ्ग्यार्थः। एतत् स्पष्टतया ध्वनयति यत् राजा चिन्ताक्लिष्टः भूत्वा अन्तःपुरगतविपदः स्वात्मरक्षार्थम् एवं कथयति। तथा च राज्ञः एतत् वचनं नाटकीयभाविकथावस्तुरूपे शकुन्तलापरित्यागकाले विदूषकस्य मौनतां सूचयति। वस्तुतः राज्ञः मनसि तापसकन्यकायां शकुन्तलायाम् अत्यधिकः अनुरागः अस्ति। प्रथमांकवर्णितकथावस्तुना एतत् स्पष्टं ज्ञायते यत् राजा दुष्यन्तः तापसकन्यां शकुन्तलां वाञ्छति। प्रथमांके तु राजा दुष्यन्तः शकुन्तलाविवाहविषये चिन्तयति तत्र स्वेच्छां प्रकटयति च। अतएव एतत् वक्तुं शक्यते यत् दुष्यन्तेनोच्चारिते प्रस्तुतवचने यद्यपि दुष्यन्तहृदयगतः शकुन्तलाभिलाषः वारितः परन्तु अत्र वस्तुध्वनिः राज्ञः शकुन्तलाप्रेम सूचयति। अतः एतत् वाक्यं प्रतिषेधरूपे वाच्यार्थे विधिरूपवस्तुध्वनिं प्रकाशयति इति आनन्दवर्धनदृष्ट्या वक्तुं शक्यते।

पुनः *अभिज्ञानशकुन्तल*नाटके तृतीयांके नेपथ्यवाक्यम् एकं श्रूयते- "चक्रवाकवधू आमन्त्रयस्व सहचरम्। उपस्थिता रजनी"[19] इति। शकुन्तलामुद्दिश्य उक्तस्य नेपथ्यवचनस्य अस्य वाच्यार्थः सहचरविदायवेलां सूचयति। परन्तु वाक्यमिदं केवलं विदायसमयं न सूचयति। अतः अत्रत्यानां शब्दानाम् उपस्थितिः किञ्चित् नाटकीयभाविकथनं द्रढीकरोति। वाक्येऽस्मिन् वाच्यार्थं व्यतिरिच्य ध्वनिरूपः एकः व्यङ्ग्यार्थः आस्वाद्यते सहृदयजनैः। एष व्यङ्ग्यार्थः अत्र सहृदयहृदयाह्लादजनको भवति। एष व्यङ्ग्यार्थः यथा— शकुन्तलादुष्यन्तौ उभयौ परस्परं प्रणयाशक्तौ स्तः इति नाटकगततृतीयांकस्य प्रथमे परिलक्ष्यते। अधुना अनसूया प्रियंवदा च एतत् ज्ञात्वा मृगशिशुं तज्जननीसमीपानयनकार्यव्यजेन शकुन्तलादुष्यन्तयोः मेलनं सुकरं कुरुतः[20]। किन्तु कस्यापि अनीप्सितजनस्य आगमनेन तत्र शकुन्तला लज्जिता न भवेत् इति सखीजनवृत्तिं मनसि निधाय आश्रममातुः गौतम्याः आगमनात् प्राक् नेपथ्ये शकुन्तलामुद्दिश्य सखीभ्याम् उक्तं प्रस्तुतं वाक्यमिदम्। प्रकृततः वाक्यस्य अस्य 'चक्रवाकवधू' इति पदेन शकुन्तला बोध्यते। 'सहचरः' इति पदेन राजा दुष्यन्तः सूचितोऽस्ति। तथा च, 'उपस्थिता रजनी' इत्यंशेन गौतम्यागमनं सूचितमस्ति। तदुपरि वक्तुं शक्यते यत् 'उपस्थिता रजनी' इत्यंशेन शकुन्तलाजीवनगता भाविविरहावस्था ध्वनिता अस्ति। पञ्चमांकगतपरित्यागसंघटनं शकुन्तलाजीवने रजनीसममेव वर्त्तते। यावत् पुनर्मिलनं न भविष्यति तावत्कालपर्यन्तं नाटके

शकुन्तला रात्रिरूपं जीवनं निर्वहति। अतएव वाक्येन अनेन एतत् नाटकीयकथावस्तु सर्वथा ध्वन्यते। वाक्यस्य अस्य व्यङ्ग्यार्थः वाच्यार्थात् अतीव चमत्कारी भूत्वा सहृदयहृदयेषु आह्लादं सम्पादयति। तथा च अत्र आनन्दवर्धनोक्तनियमानुसारं व्यङ्ग्यार्थः वाच्यार्थात् बहुदूरं गच्छति। अतएव अस्मिन् वाक्ये व्यङ्ग्यार्थः वाच्यार्थात् सम्पूर्णं पृथग्रूपं भूत्वा काव्ये वस्तुध्वनिं साधयति[21] इति कथने न कोऽपि दोषः।

*अभिज्ञानशकुन्तल*नाटके चतुर्थांके अनसूयामुद्दिश्य प्रियंवदा कथयति "को नाम उष्णोदकेन नवमालिकां सिञ्चति"[22] इति। अस्मिन् वचनेऽपि वस्तुध्वनिः सुस्पष्टरूपेण विद्यते। वचनस्य अस्य वाच्यार्थः एवं प्रवर्त्तते यत् न कोऽपि जनः उष्णजलसेचनेन नवमल्लिकापुष्पं नाशयति। वाक्यस्य अस्य वाच्यार्थे अस्त्यर्थकपदप्रयोगेन विधिरूपः अर्थः निर्दिश्यते। किन्तु वाक्येऽस्मिन् वाच्यार्थात् भिन्नः व्यङ्ग्यार्थरूपः प्रतीयमानार्थः एकः वर्त्तते। स प्रतीयमानार्थः एवं भवति यत् शकुन्तलादुष्यन्तयोः गान्धर्वविवाहो भवति नाटकस्य तृतीयांके। तदनन्तरं राजा दुष्यन्तः राजधानीं गच्छति। तस्मात् शकुन्तला विरहविदीर्णा अस्ति। अतः अतिथिसत्कारविफलां शकुन्तलां दुर्वासा अभिशापविद्धां करोति। विषयेऽस्मिन् शकुन्तला अवगता नास्ति। तदनन्तरं सखिद्वयं मुनिसमीपं गत्वा अनुरोधं कृत्वा च अभिशापकाठिन्यं किञ्चित् न्यूनीकरोति। परन्तु अयं सन्दर्भः शकुन्तलामनोगोचरो न भवेत् इति सखिद्वयस्य वाञ्छा अस्ति। यतः प्रकृतिकोमला शकुन्तला ताभ्यां रक्षितव्या। अस्मिन् प्रसङ्गे प्रस्तुतवाक्यस्य अस्य 'नवमालिका' इति पदेन शकुन्तला बोध्यते। 'उष्णोदकम्' इति पदेन दुर्वाससः शापः सूचितोऽस्ति। स्वभावकोमला शकुन्तला शापं सहितुम् अक्षमा। अतः एषा वार्ता तस्यै न देया इति वाक्यस्य अस्य निगुढार्थः। अनेन विधिप्रतिपादकस्य अस्य वाक्यस्य प्रतिषेधघटकः व्यङ्ग्यार्थः स्पष्टं प्राप्यते। स एव वस्तुध्वनिरूपः इति आनन्दवर्धनदिशा वक्तुं शक्यते[23]।

एवंक्रमेण परिलक्ष्यते यत् समग्रे *अभिज्ञानशकुन्तल*नाटके कदापि पदेन कदापि वाक्येन कदापि च सम्पूर्णेन श्लोकेन सहृदयहृदयाकर्षकः वस्तुध्वनिः निर्बाधं तिष्ठति। तत्सर्वं सम्मिल्य सम्पूर्णस्य काव्यस्य उपादेयतां वर्धयति इति निश्चितं वक्तुं शक्यते।

## Endnotes

1. येनास्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्राः पञ्चषा वा महाकवयः इति गण्यन्ते। *ध्वन्यालोकः,* प्रथमोद्योतः, कारिका-६, वृत्तिभागः।
2. सर्वगुणयोगी महाकविः........योऽन्यतरप्रबन्धे प्रवीणः स महाकविः। *काव्यमीमांसा,* पञ्चमोऽध्यायः।
3. चलापाङ्गां दृष्टिम्......... इत्यादिः। *ध्वन्यालोकः,* द्वितीयोद्योतः, कारिका-१९, वृत्तिभागः।
4. वस्तुमात्रमलंकाररसादयश्चेत्यनेकप्रभेदप्रभिन्नो दर्शयिष्यते। *ध्वन्यालोकः,* प्रथमोद्योतः, कारिका-४, वृत्तिभागः।
5. सर्वेषु च तेषु प्रकारेषु तस्य वाच्यादन्यत्वम्। तत्रैव।

6. स ह्यर्थो वाच्यसामर्थ्याक्षिप्तं वस्तुमात्रमलंकाररसादयश्चेत्यनेकप्रभेदप्रभिन्नो दर्शयिष्यति। *ध्वन्यालोकः,* प्रथमोद्योतः, कारिका-४, वृत्तिभागः।
7. आलोकार्थी यथा दीपशिखायां यत्नवान् जनः। तदुपायतया तद्वदर्थे वाच्ये तदादृतः॥ तत्रैव, कारिका-९।
8. तत्र प्रतीयमानस्य तावत् द्वौ भेदौ— लौकिकः काव्यव्यापारैकगोचरश्चेति। तत्रैव।
9. लौकिकः यः स्वशव्दवाच्यतां कदाचिदधिशेते, स च विधिनिषेधाद्यनेकप्रकारो वस्तुशब्देनोच्यते। तत्रैव ।
10. *अभिज्ञानशकुन्तलम्,* द्वितीयांकः, गद्यभागः।
11. राजा— माधव्य, अप्यस्ति शकुन्तलादर्शने कुतूहलम्। तत्रैव।
12. विदूषकः— प्रथमं सपरीवाहम् आसीत्। इदानीं राक्षसवृत्तान्तेन बिन्दुरपि नावशेषितः। तत्रैव।
13. राजा— (सस्मितम्) कथमेतद् भवति सम्भाव्यते। तत्रैव, गद्यभागः।
14. विदूषकः— (नेपथ्ये) कथं न भेष्यामि? एष मां कः अपि प्रत्यवनतशिरोधरम् इक्षुम् इव त्रिभङ्गं करोति। तत्रैव, षष्ठांकः, गद्यभागः ।
15. क्वचिद्वाच्ये प्रतिषेधरूपे विधिरूपः। *ध्वन्यालोकः,* प्रथमोद्योतः, कारिका-४, वृत्तिभागः।
16. *अभिज्ञानशकुन्तलम्,* द्वितीयांकः, गद्यभागः।
17. राजा— वयस्य, ऋषिगौरवादाश्रमं गच्छामि। तत्रैव ।
18. राजा— परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः। तत्रैव, श्लोकः-१८।
19. *अभिज्ञानशकुन्तलम्,* तृतीयांकः, गद्यभागः।
20. प्रियंवदा— अनसूये, यथा एष इतो दत्तदृष्टिः उत्सुकः मृगपोतकः मातरम् अन्विष्यति। एहि। संयोजयाव एनम्। तत्रैव।
21. क्वचिद्वाच्याद्विभिन्नविषयत्वेन व्यवस्थापितः। *ध्वन्यालोकः,* प्रथमोद्योतः, कारिका-४, वृत्तिभागः।
22. *अभिज्ञानशकुन्तलम्,* चतुर्थांकः, गद्यभागः।
23. स हि कदाचित्वाच्ये विधिरूपे प्रतिषेधरूपः। *ध्वन्यालोकः,* प्रथमोद्योतः, कारिका-४, वृत्तिभागः।

## BIBLIOGRAPHY


- Chakraborty, S. *Abhijñānaśakuntalam.* 6th Ed., Sanskrit Pustak Bhandar, Kolkata, 2005.
- Basu, A. C. *Abhijñānaśakuntalam.* 4th Ed., Sanskrit Book Depot, Kolkata, 2003.
- Bandyopadhyay, A. K. *Dhvanyālokaḥ.* Sanskrit Pustak Bhandar, Kolkata, 2008.
- Dwivedi, S. P. *Dhvanyālokaḥ.* 1st Ed., Chaukhamba Surbharati Prakashan, Varanasi, 2013.
- Mukhopadhyay, B. K. *Sāhityadarpaṇaḥ.* 2nd Ed., Sanskrit Pustak Bhandar, Kolkata, 2013.
- Panday, B. *Daśarūpakam.* 6th Ed., Motilal Banarsidass, Delhi, 2015.
- Bandyopadhyay, S. C. *Nāṭyaśāstram.* 6th Ed., Nabapatra Prakashan, Kolkata,

2014.

- Mishra, R. *Vakroktijīvitam.* Chowkhamba Sanskrit Sansthan, Varanasi, 2001.
- Dwivedi, R. P. *Vyaktivivekaḥ.* Chowkhamba Sanskrit Series Office, Varanasi, 1964.
- Jha, G. *Kāvyaprakāśaḥ.* Bharatiya Vidya Prakashan, Varanasi, 1967.
- Jha, B. *Kāvyālaṅkārasūtravr̥ttiḥ.* Chowkhamba Sanskrit Sansthan, Varanasi.
- Keith, A. B. *The Sanskrit Drama.* Oxford University Press, London, 1924.
- Keith, A. B. *A History of Sanskrit Literature.* Oxford University Press, London, 1920.
- Smith, V. A. *The Early History of India.* Oxford University Press, London, 1914.
- Winternitz, M. *A History of Indian Literature.* Vol-3, Motilal Banarsidass, Delhi, 1985.
- Dasgupta, S. N. *A History of Sanskrit Literature.* Calcutta University Press, Calcutta, 1947.
- Krishnamachariar, M. *History of Classical Sanskrit Literature.* Tirumalai Tirupati Devasthanam Press, Madras, 1937.
- De, S. K. *History of Sanskrit Poetics.* Firma K. L. Mukhopadhyay, Kolkata, 1960.
- Kane, P. V. *History of Sanskrit Poetics.* 4th Ed., Motilal Banarsidass, Delhi, 1971.
- Das, D. K. *Saṁskr̥ta Sāhityera Itihāsa.* Sadesh, Kolkata, 2016.

——